# Bharatabhumirvilasati

# ભારતભૂમિર્વિલસતિ

## Document Information

Text title : Bharatabhumirvilasati

File name : bhAratabhUmirvilasati.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Dr. Ramakant Shukla

Proofread by : Mandar Kulkarni

Acknowledge-Permission: Dr. Ramakant Shukla, Devavani Parishad, Delhi

Latest update : May 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2024

*sanskritdocuments.org*

# ભારતભૂમિર્વિલસતિ

ભારતભૂમિર્વિલસતિ ।

વૈદિક-સૌગત-નાસ્તિકચાર્વાકાર્હત-પ્રભૃતિબહુધર્માઃ

વાદે વાદે બોધં, યત્ર લભન્તે મુદોત્ફુલ્લાઃ ॥ ૧॥

ઔદાર્યં ધાર્મિક્યં આધ્યાત્મ્યં નિત્યપ્રગતિશીલત્વમ્ ।

અન્યે ચાપિ યદીયાઃ, વિશ્વસ્મિન્ સદ્ગુણાઃ ખ્યાતાઃ ॥ ૨॥

પ્રકૃતિવિલાસો યસ્યાં, વિકિરતિ હાસં સ્વકીયમવદાતમ્ ।

કષ્ટ સહિષ્ણુત્વં ચ, યસ્યાઃ પ્રકૃતૌ સહજસિદ્ધમ્ ॥ ૩॥

વિરોધિનાં તત્ત્વાનાં, સત્ત્વાનાઞ્ચાપિ વિષમવૃત્તીનામ્ ।

સમન્વયં યા કુરુતે, નવનવશોભાભિવૃદ્ધ્યર્થમ્ ॥ ૪॥

આશાવાદરતાયાઃ, આદર્શોદ્ઘોષણા સુનિપુણાયાઃ

યસ્યા નિખિલાપીયં, વસુધૈવ કુટુમ્બકં ભવતિ ॥ ૫॥

લોકોત્તરચરિતાનાં, લોકારાધન નિયુક્તમનુજાનાં

યા જન્મભૂમિરુદિતા, રુદિતા અપિ યત્ર હસિતાઃ સ્યુઃ ॥ ૬॥

સ્નેહં દયાં ચ સૌખ્યં, જાયામપિ યત્ર લોકપૂજાર્થમ્ ।

મુઞ્ચન્ રામોઽદ્યાપિ ભગવાનિવ પૂજ્યતે લોકૈઃ ॥ ૭॥

ગીતા ગઙ્ગા ગાવો, ગીર્વાણગવી તથા ચ ગીતાનિ ।

ગ્રામાઃ ગુરવો ગ્રન્થાઃ, યસ્યા ગરયન્તિ ગરિમાણમ્ ॥ ૮॥

અક્રોધેન ક્રોધં, સાધુતયા ચાપ્યસાધુતાસરણિમ્ ।

દાનેન યા કદર્યં, જયેદહિંસાબલેન હિંસાં ચ ॥ ૯॥

સત્પુત્રાણાં હિ યથા, કુપુત્રકાણાં તથૈવ યા ચેષ્ટાઃ ।

સમબુદ્ધ્યા કિલ સહતે, યતો ન માતા કુમાતા સ્યાત્ ॥ ૧૦॥

વાણીવિહારશીલા, શીલાબ્ધિતરઙ્ગિતા જલધિરશના ।

સુજલા સુફલા શસ્યશ્યામા સુખદા તથા વરદા ॥ ૧૧॥

અગણિતગુણગણપૂર્ણા, ચિત્રવિચિત્રૈર્જનૈસ્સદા લસિતા ।
આર્યા ભારતભૂમિર્વિલસતિ જગતીતલે સેયમ્ ॥ ૧૨॥

જય ભારતભૂમે ! (સંસ્કૃતકાવ્યમ્)
રચના - ડૉ. રમાકાન્ત શુક્લઃ

Proofread by Mandar Kulkarni

*Bharatabhumirvilasati*
pdf was typeset on May 11, 2024

Please send corrections to *sanskrit@cheerful.com*